## ।। अथ चतुर्दशोऽध्याय : ।। Chapter-14

राजोवाच :- कानि तीर्थानि विप्रेंद्र के देवा: के वराश्रमा: ।।
देवखाताश्च कतिषु देवास्तत्रावतस्थिरे ।। १

एतदाचक्ष्व मे ब्रह्मन् परं कौतूहलं यत: ।।
नहि श्रीमालमाहात्म्यं शृण्वतस्तृप्तिरस्ति मे ।। २

वसिष्ठ उवाच :- श्रूयतां राजशार्दूल तीर्थानुक्रममादित: ।
यत: प्रभृति तीर्थानि कर्तव्यानि नरैरिह ।। ३

त्र्यंबके सर: श्रेष्ठे कर्तव्यं स्नानमादित: ।।
पितृन्देवांश्च संतर्प्य पूजनीयो महेश्वर: ।। ४

अत्र पूर्वं तपस्तेपे त्रिपुरक्षयहेतुना ।।
गणै: परिवृतो राजन् दंडपाणिर्महेश्वर: ।। ५

राजोवाच :- कथं चकार देवेशस्तपांसि द्विजसत्तम ।
तप: फलप्रदो यस्मादन्येषामपि शंकर : ।। ६

-०-

ई बी १ स्थिते, बी-२ श्रूयंती, ई बी ३ न, ई बी ४ म:,
ए(१) प्रभृति ( ए २) देवखाता: कतिकाश्च

वसिष्ठ उवाच :- पूर्वमासीन् महीपाल त्रिपुरो नाम दानवः ।।
तस्माल्लोकाः समुद्विग्नाः शंकरं शरणं ययुः ।। ७
कैलाशशिखराभ्याशे संस्तुतः प्राहतानिदं ।। ८

देवदेव उवाच :- हंत शक्रादयो देवाः किमिच्छंति मनोगतम् ।।
किं वा घातयितुं दैत्यमीहंते दुष्टचारिणं ।। ९

देवाऊचुः- त्रिपुरेण वयं देव त्वयादत्तवरेण वै ।।
संतप्ता न धृतिं जातु त्रैलोकेऽपि लभेमहि ।। १०

उपद्रुता महात्मानो मुनयः शंसितव्रताः ।।
तस्मै हवींषि यच्छंति भीता यज्ञेषु वै हर ।। ११

त्रैलोक्यं त्याजिता देव बलिना दुर्बला वयं ।।
त्रीणि तस्य पुराग्राणि पर्यटंति नमस्तले ।।
दुर्निरीक्ष्याणि तेजोभिस्तेषां भंगकथाः कुतः ।। १२

-०-०-०-

ई बी १ सं, ई बी २ जग्मुस्त्रैलोक्ये, ई २(१) वृताः, ई बी ३ जितादेतुन, ई -१ त्रिपु हंतशतोक्राद,

-०-

(ए१) भ्यासे

(ए२) भगतं

(ए३) नघृतं

(ए४) त्याजितता

(ए५) त्रिणि

(ए६) ग्राणि

य एकेनैव बाणो त्रिपुरीभिद्कृद्भवेत् ।।
स हंति त्रिपुरं दैत्यं नभोंगणविहारिणम् ।। १३

त्वया दत्तवरो दैत्यस्त्वयैव तु विहन्यते ।।
इति निश्चित्य देवेश देवास्त्वां शरणं गता: ।। १४

देवदेव उवाच :- मा भैष्ट त्रिपुराद्दैत्याद्दानवेंद्राद्दुरात्मन: ।।
अचिरात् हनिष्यामि वृत: सर्वै: सुरोत्तमै: ।। १५

अहं वै परमं योगं किंचित् कालमुपास्म्यहम् ।।
सर्वे गच्छंतु भद्रं वो यथास्थानं दिवौकस: ।। १६

वसिष्ठ उवाच :- तन्निशम्य तदा राजन् देवदेवस्य भाषितम् ।।
जग्मुर्यथागतं देवास्तथेत्युक्त्वा त्रिलोचनम् ।। १७

देवानाश्वास्य देवोपि योगिध्येयो वृषध्वज: ।।
विविक्तमिदमासाद्य भूप्रदेशंगणै: सह ।। १८

-0-0-0-

ई बी १ नैव, ई बी २- त्रिपुरीमिंद, ई बी ३- हंसतित्रिपुरंदै,
ई बी ४- णां, ई बी ५- ह, ई बी ६- शम्भुसुरा राजन्
७- ई बी न, बी -८ सहं

-0-

( ए१) रि

ई१ बी१
स्थितिं चकार भगवान्हिताय जगतां विभुः ।।
ए१ बी२
भूमिशोधनहेत्वर्थमग्नीन्संस्थापयद्विभुः ।। १९

बी३ बी४
गृहीत्वा वार्षिकीं दीक्षामयजद् बहुभिर्मखैः ।
बी५ ए२
हव्यैः संतर्पिता देवा बभूवुर्बलशालिनः ।। २०

अथ संवत्सरस्यांते ताः समाप्यमखक्रियाः ।।
दण्डेनैवाभिदत्भूमिंप्रांतं तु विशोधिता ।। २१
ए३
उदतिष्ठत्ततो वारि स्वच्छं स्वादु निरामयं ।। २२

भद्रकर्णप्रभृतयः प्रमथास्तत्र तत्क्षणात् ।।
आदेशाद्देवदेवस्य बबंधुः सेतुमंततः ।। २३

ततो निक्षिप्य तत्पार्श्वे शंभुस्तान् प्रमथाधिपान् ।।
बी६
अंतर्विवेश नीरस्य तदा योगेश्वरो हरः ।। २४

स्वशरीरार्धहारिण्या सह शक्त्या जगत्प्रभुः ।।
परमं योगमातिष्ठद् बाह्यं शिवसंज्ञकं ।। २५

-०-

बी १ प्रभुः, ई बी २ पयद्विभुः बी ३ टेही, बी ४ कां, बी ५ संप्रीणिता, बी ६- हरिः, ई १- जायजगतां प्रभुः

-०-

(ए१) स्थापयतिविभुः

(ए२) बभूवु

(ए३) दंडेनैवाभ्यहन्

(ए४) सहशक्त्या

परमानंदसंलीनमानसे वृषभध्वजे ।।
गते बहुतिथे काले सुरा ऊचुर्बृहस्पतिम् ।। २६

देवा ऊचुः :- परमार्तिरिहो लोके मुनीनां भावितात्मनाम् ।।
पीडिताः त्रिपुरेणेह यागभागापहारिणा ।। २७

किं कुर्महे क्व गच्छामस्त्वमस्माकं परा गतिः ।।
मंत्रं देहि तदस्माकं यत्कर्तव्यं बृहस्पते ।। २८

बृहस्पतिरुवाच :- अंतकालोऽस्य दैत्यस्य सांप्रतं वर्तते सुराः ।।
तदागच्छत गच्छामो यत्र योगपरः शिवः ।। २९

तेन संवत्सरं पूर्णमिष्ट्वा यूयं हि तर्पिताः ।
अधुना तु जलांतस्थः पुण्यमासाद्य भूतलम् ।।
सेवते परमं योगं गच्छामस्तत्र मा चिरम् ।। ३०

वसिष्ठ उवाच :- अथ निश्चित्य देवेन्द्रः पुरोधाय बृहस्पतिम् ।
सहदेवैर्जगामाशु यत्र देवो जलाशये ।। ३१

---

बी १ विहता, बी २ दास्माकं, बी ३ पूर्णमिष्ट्वावत्, बी४- इ ।
ए (१) ध्वजे
ए (१) पीडिता
ए (२) ईष्ट्वा

बी १
निविष्टास्तस्य सरस्वतीरे देवा: सवासवा: ।।
तुष्टुवु: सहितास्तत्र देवदेवमतंद्रिता: ।। ३२

देवा ऊचु: नम: परमदेवाय शाश्वताय महात्मने ।
अव्यक्तव्यक्तरूपाय पराय परमाय च ।। ३३

यं गृणंति तपोनिष्ठाश्चिंतयंति च योगिन: ।
परमं ब्रह्मरूपं तं नमाम: परमेश्वरम् ।। ३४

शाश्वतं रूपमज्ञेयं मनोयमनामयम् ।
बी २
परमं निष्कलं ब्रह्म तस्मै ज्ञानात्मने नम: ।। ३५

पवित्रं य: पवित्राणां मंगलानां च मंगलम् ।
बी ३
तेजसामद्वयं तेजस्तस्मै श्रेष्ठात्मने नम: ।। ३६

प्रधानाय महेशाय षड्डूर्मिरहिताय च ।।
नमोऽसत्सदनंताय भूतानां पतये नम: ।। ३७

-०-०-

बी १ निषिणास्तत्रसरस्तीदेवा
बी २ ज्ञ
बी ३ ज:

यत: प्रवर्त्तते सर्वं पर्वतेभ्य इवापगा : [बी १] ।
तं नता: स्म: [ए४] महाबाहुमजमदायमव्ययं [बी २] ।। ३८

यो महीसलिलाकाशतेजोवायुस्वरूपधृक् ।।
चंद्रार्कयजमानाख्यो [बी ३] यो बिभर्ति परास्तनू: [ए१] ।।
तस्मै [बी ४] ब्रह्मांडमयाय नमस्त्रमूर्तिधारिणे ।। ३९

य: पालयति भूतानि संहरत्यतिपर्यये ।
यत्र प्रतिष्ठितं विश्वं तस्मै सर्वात्मने नम: ।। ४०

अश्वमेधादिभिर्यागैर्यैर्जयंति द्विजातय: ।।
अशेषजगदीशाय तस्मै हव्यभुजे नम: ।। ४१

नमस्ते वृयोमकेशाय व्योमरूपाय ते नम: ।
नमस्ते मन्यवे रुद्र रुद्राणां पतये नम: ।। ४२

यन्निमेषाऽखिलोत्पत्ति [ए२] रुन्मेषाऽखिलात्यय: [ए३] ।
स्थितिप्रलयकाराय तस्मै विश्वात्मने नम: ।। ४३

-०-

बी १ गा, बी २ स्मकगशीपजंम, बी ३ यार्विभर्तिपरास्तनु:
बी ४ बीजायनमश्चिन्मयरूपिणे ।

(ए१) तनु:

(ए२) यन्निमेशोऽखिलोत्पत्ति

(ए३) षाऽखिलात्यय:

(ए४) स्म

शंकराय नमस्तुभ्यं शंभवाय भवाय च ।
गिरिशाय वरिष्ठाय श्रेष्ठाय महसे नमः ॥ ४४

सुगंधिने सुबोधाय त्र्यंबकाय यजामहे ॥
नीलग्रीवाय नीलाय नमस्ते लोहितत्विषे ॥ ४५

रूपातीताय दिव्याय कृतरूपाय ते नमः ।
भुवनार्तिहरो भीमो भवानीश्वराचरे ॥ ४६

अतस्त्वां शरणं प्राप्तास्त्रिपुरार्तां दिवौकसः ॥ ४७

वसिष्ठ उवाच :- स्तूयमानः सुरैरित्थं देवदेवो महेश्वरः ।
उदतिष्ठज्जलात्तस्माद्योगशक्तिं विहायताम् ॥ ४८

अथ वीक्ष्य महादेवमव्यक्तं व्यक्ततां गतम् ॥
बद्धांजलिपुटाः सर्वे प्रणेमुः परमेश्वरम् ॥ ४९

देवदेव उवाच :- स्वागतं वोऽस्तु वै देवाः साधयामि किमीप्सितम् ।
भस्मीभवतु वा कोऽद्य द्वेष्टा स्वर्गनिवासिनाम् ॥ ५०

-०-

ई बी १ त
(ए १) गिरिष्टाय
(ए२) दीव्याय
(ए३) योग
(ए४) मि

देवाऊचुः :- उक्तमेवास्तु नो देव रिपुनाशस्त्वया कृतः ।
प्रतिश्रुतिं त्वया पूर्वं हनिष्ये त्रिपुरं त्विति ।। ५१

तत्र साधय भूतेश त्रिपुरदाय मद्य वै ।।
यथा हते त्वया दैत्ये मोदंते दिवि देवताः ।। ५२

अदस्दाने मुनीन्द्रेभ्यो हव्यानि त्रिपुरे बलात् ।।
त्वया देव मखस्तोमैरिह संप्रीणिता वयम् ।। ५३

त्र्यंबकमिति ख्यातं लोके तस्मादिदं सरः ।।
भविष्यति परं तीर्थं देवानामपि दुर्लभम् ।। ५४

वसिष्ठ उवाच :- इत्युक्तवत्सु देवेषु पुरतो वन्हिरेतसः ।।
प्रादुरासीज्जलात्तस्माद्योगशक्तिर्महामयी ।। ५५

तां दृष्ट्वा तुष्टुवुः सर्वे प्रणेमुश्च सविस्मताः ।
देवीं देवगणा राजन्स्फारीकृत दृशस्तदा ।। ५६

-०-

बी १ एतमुं , बी २ हनिष्ये,इबी ३ तत्रः, ई बी ४ मद्यवैः,
ई बी ५- यथातेत्व, ई बी ६- जुलादेवीयोग, ई बी ७- देवा,
ए हानष्ये
ए (१) प्रतिश्रूतं
(ए२) हानष्ये
(ए३) भूतेषा
(ए४) दष्ट्वा

गंधर्वा वसवो रुद्रा: सिद्धा: साध्या मरुद्गणा: । ए१

मुनयश्च महात्मानो योगिन: समदर्शना: ।। ५७

तामुवाच महादेवो योगशक्तिं नृपात्मज ।।

इहैव तिष्ठ देवेशि यावद्धन्मि सुरद्विषा(न्) ।। बी१ ५८

बालादाक्रमता देवि मम दैत्यवर्षिणा: ।। ए२

न शक्ता पृथिवी सोढुं भारमेव कथंचन ।। बी२ ५९

ततो भाराग्निमज्जंती रक्षा त्वमवनिर्मिमा(म्) ।

तथेत्युक्त्वा जगद्धात्री तस्थौ त्र्यम्बके तटे ।। ए३ बी३ ६०

अथ ब्रह्मा मुकुंदश्च तत्राजग्मतुराहतो । बी४ ए४

हरं त्रिपुरनाशाय प्रेरयामासतुर्भृशम् ।। ६१

रथं वसुमतीं चक्रे चक्रे चन्द्रदिवाकरौ ।।

वृषो विष्णु विहंगेन्द्रौ सारथिं च पितामह(म्) ।। ए५ बी५ ६२

-०-०-०-

बी १ षां, बी २ मेधु, बी ३ सरौ, बी ४ जग्मु, इबी ५ थिं

(ए१) मरुन्दणा:

(ए२) वर्षिणा:

(ए३) त्र्यंबके

(ए४) द्रु

(ए५) विहगेंद्रा

[बी१ ए१] अभीषुं नागराजानं [बी२] यौक्त्रे तदा कंबलौ ।
इति सर्वं समासाद्य तमारुह्य रथोत्तमं ।
पिनाकं कार्मुकश्रेष्ठमाददे [बी३] धूर्जटिस्तदा ॥ ६३

अनुजग्मुर्[बी४]महेशानं वासवेन सहामरा: ।
[ए२] बद्ध-गोधांगुलित्राणा [बी५] वरयानेन गामिन: ॥ ६४

चकंपे मेदिनी राजन् [बी६] सशैल वनकानना ॥
आक्रांतं गगनं मेघैश्चुक्षुभे [बी७] मकरालय: ॥ ६५

परित्रस्ता भूत-गणा: संकुला: खेचरैर्[बी८]दिश: ।
[बी९ ए३] शीघ्रं गगनमास्थाय स्वस्ति जेपुर्[बी१०]महर्षय: ॥ ६६

अशिवं च शिवा नेदुरग्निज्वालाकुलैर्मुखै: ।
संहार इव [बी११] भूतानामकाले [इ१] विहितै: किल ॥ ६७

आसीत्तदा महीपाल पराक्रमति शूलिनि ।
पुराणि तस्य दैत्यस्य [ए४, इ३] भृशं व्योमनि रेजिरे ॥ ६८

--०--०--

ई बी १- अधीशोनाग, ई बी २ नां, ई बी ३ धुर्जि, ई बी ४ महेद्रावासवास, ई बी ५- नाग्र गामिन:, बी ६ सै, बी ७ न्नेमक, ई बी ८ दिश, ई बी ९ शी, बी १० ये:, ई बी ११ मिव्भूता, १ ई विहिवै: त: लियेकिल, २ ई कानन:, ३ ई पुराणितस्यतंदैत्यस्य

(ए १) अभीशुं
(ए२) बुद्ध
(ए३) शिघ्रं
(ए४) भ्रशं

अध्धौ[ई१] विधूयमानानिपत्राणीव[ए१ बी१] नमस्वता ।

तदासीत्तुमुलं युद्धमतिघोरं क्षयावहं !

देवानां दानवानां च हरत्रिपुरसंगमे ।। ६९

पुराणि विषमस्थानि तानि[ए२] हंतुं न गोचरे ।।

भवंति व्योमकेशस्य लक्षोन्यस्तदशो ह्यपि ।। ७०

देवैः संमर्दिता[बी२] दैत्या दैत्यैश्च[ए३] शतशः सुराः[बी३] ।।

रेणु[बी४]क्रीडीकृतं व्योम्नि नैति दृष्टिपथं रविः ।। ७१

अंधकारावृतो लोको न प्राज्ञायत किंचन ।।

कांश्चिद्वज्रेण देवेंद्रः प्रजघानाशु दानवान् ।। ७२

कांश्चिद्देवाः कृतोत्साहा गणाः [कांश्चन][ए४] भूरिशः ।।

निपेतुः शतशो[ए५ बी५] राजन्नंबरे शस्त्रविद्धिषाः ।। ७३

-०-०-०-

बी १ ता, बी २ संवर्द्धिता, ई बी ३ शमुराः, ई बी ४) क्रीमिकृतोत्साह-
गणाभूरिशः -ई- क्रीडोमीकृतो कागुणाःकाश्चनभूरिशः ।
ई बी ५ शो, १ ई अष्टोविमूयघूयमानानिया
श्लोक
(ए१) स्वतां
(ए२) नानि
(ए३) दैत्यै
(ए४) भूरिषाः
(ए५) शतसो

बी१ ए१ बी२
त्रिपुर्याश्च प्रकोटस्था दैत्यर्युयुधिरे सुरा: ।
बी३ बी४
महाबला महोत्साहा वक्रदंष्ट्रा: करालिन: ।। ७४

पुराणां सन्निधौ राजन्मयेन निर्मितं सर: ।।
सुधापूर्णमिमूत्तत्र नमसीदुरिवोज्ज्वल: ।। ७५

तज्जले निहिता दैत्या प्लाविता त्रिपुरान्तर्गै: ।
बी५
वह्निरे पुनरुत्थानं प्रात: सुप्तोत्थिता इव ।। ७६

ए२ बी६ ए३
एवं तैर्मृतजीवाब्धिस्त्रिदशा: विधुरीकृता: ।।
ई२
ततश्चुक्रोध भगवानादिदेवो जनार्दन: ।। ७७

सहसायुगमुत्सृज्य नादेव्याकुलयन् नभ: ।
तेनैव वृषरूपेण त्रासयामास दानवान् ।। ७८

बी७
वित्रास्य दानवानीकं विषाणाक्षेपणै: प्रभु: ।
ए४
पपौ सर: सुधापूर्णमगस्त्यरिव सागरम् ।। ७९

-०-०-

ई बी १- त्रिपुरीक्कोट्टि, ई बी २ श्रुरा, बी ३ बल, ई बी ४ द्रष्टाकरालिन:, बी ५ प्रात- ई पुनरुत्थायेनप्रातसुप्तोत्थिताइव ई बी ६- विधुरी, बी-७- वित्रासदानवानीकं - ई वित्रास्यदानवानीकं विषाणाक्षेपणैप्रभु:, ई१- ततश्चुक्रोभभगवान आदिदेवो जनार्दन:

-०-

(ए१) प्रकोटिस्था

(ए२) दश:

(ए३) विधुराकृता:

(ए४) मगस्त

इ१ बी१

पीत्वा तत्सहसा विष्णुर्मिषातां च सुरद्विषाम्।
आजगाम रथं शंभोः श्येनपातवदच्युतः ।। ८०

ए१
तद्दृष्ट्वाक्सुमहत्कर्म केशवस्य महात्मनः ।
२इ बी२
तुष्टुवुः कृष्णया देवाः साधुसाध्विति चाब्रुवन् ।। ८१

३इ
सुधारसरसि पीते वै विष्णुना प्रभविष्णुना ।।
ए२ बी३
वैलक्ष्यं परमं प्राप त्रिपुरो दानवेश्वरः ।। ८२

अथ दैत्यैर्बलवद्भिर्दानवा बहुशोऽर्दिताः ।।
पुरप्राकारमारूढाः कृच्छ्रायुधैर्नृप ।। ८३

ए३ ४बी ए५
देवानां का निर्मुक्तैः शूलैः प्रासैः परश्वधैः ।।
ए६
भिन्दिपालैः तथायस्कैः मुशलैः परिघैस्तथा ।। ८४

चक्रैः पाशैर्महाखड्गैः शक्तिसायकतोमरैः ।
ए७
पुराणामंतरं राजन् दैत्यसैन्यानि जघ्निरे ।। ८५

-०-

बी १ र्मि, इ बी २ सुध, इ बी ३- पुरे, इ बी ४ शूलैः,
२ इ त्रष्टुवुःकृष्णयादेवा । १ इ तंपीत्वासहसा विष्णुर्मिष्तांचसुर द्विषां
इ सुधसाध्विचिचाब्रवीत् ।
(ए १) महात्मनः
(ए २) वैलक्ष्यं
(ए ७) जघ्निरे
(ए ३) निर्मुक्तैः
(ए ४) शूलैं
(ए ५) परस्विधै
(ए ६) भिंडिमालिमिश्यस्कै

केतनानि प्रभग्नानि गोपुराणि च सर्वशः ।
अथ तस्मिन् महायुद्धे वर्तमानेऽतिभीषणे ।। ८६

लब्धलक्षो हरः क्रुद्धो भृकुटीकुटिलाननः ।
संधाय शरमाग्नेयमाचकर्ष महद्धनुः ।। ८७

आकृष्यमाणे बाणाग्रे तत्र भूतापहारिणा ।
सर्वं व्याकुलतामाप जगत्स्थावरजंगमम् ।। ८८

स्वस्त्यस्तु सुरवृंदस्य इत्यूचुः खे महर्षयः ।। ८९

अथ मुक्तो महेशेन महेषुर्वह्निदैवतः ।
युगांताग्निरिवोद्भूतः प्रददाह पुरत्रयम् ।। ९०

दह्यमाना हुताशेन वायुनुन्नेन दानवाः ।।
विविशुः सागरं केचित् केचित् पातालमाश्रयन् ।। ९१

-०-०-

इ वी १ संहरः । इ वी २ म, ३ इ वा
( ए १) महद्धनुः ( ए १) सर्वं

निपेतु: कृतशीर्णांगा: अर्धदग्धाश्च भूतले[१] ।
तत्पुरत्रयमाक्रुष्टं सह दैत्यैश्च दानवै:[ई१] ।।
निपपात पयोराशौ तार्क्ष्यमुक्तमहाहिवत् ।। ६२

तत: शांता दिश: सर्वा: प्रसन्नोऽभूद्दिवाकर: ।
ववौ च शिशिरो वायु: सुगंधिर्विमल: शिव: ।। ६३

संस्तूयमानो देवौघैर्[ए१]गंधर्वोरगकिन्नरै: ।
चारणैर्मुनिभि: सिद्धैर्[ए२]ब्रह्मणा विष्णुना तथा ।।
आययौ प्रमथै: सार्द्धमिहैव त्रिपुरांतक: ।। ६४

दंडाभिघातसंभूतवारिपूर्णे सरोवरे ।
निममज्ज महादेव: सह सर्वै: सुरोत्तमै: ।। ६५

कृतस्नानश्च[ए३] भूतेशो[ए४] बिभ्राणा:[ए५] परमं महः[२ई] ।
संस्तूय विविधै: स्तोत्रैरभ्यर्च्य कुसुमोत्करै: ।।
इदमुक्तं[३] महीपाल[ए६] दैवैर्देवकृतादरै:[४] ।। ६६

-०-०-

ई बी १ ले, ई बी २ सहदेवै:, ई बी ३ मुक्तो, ई बी ४ दर:,
१ई- सहदैतेयदानवै:, २ ई सह:

(ए१) देवौघै
(ए२) सिद्धै
(ए३) स्नानंच
(ए४) श
(ए५) णा
(ए६) हि

देवाऊचु: किमस्माभिर्महेशाय दत्तं स्यादिह तुष्टये।
तथापि तन्मनोभीष्टं विहितं किल दैवतैः ।। ९७

देवदेव उवाच :- इदं मम मनोहारि वारिपूर्णं महत्सरः ।
त्र्यंबकमितिख्यातं प्रयाति भुवनत्रये ।। ९८

तत्राहं निवसिष्यामि योगशक्त्या सहान्यया ।।
दधानः परमां तुष्टिं सर्वलोकहिताय वै ।। ९९

इह यः श्रद्धया युक्तो वृषभो दास्यते पुमान् ।
पूरयिष्यामि तस्याहं सर्वान्कामान् यथेप्सितान् ।। १००

कृष्णापक्षे चतुर्दश्यां अत्र यः श्रद्धया युतः ।
तिलान् दास्यति विप्राय तस्य संततिरक्षया ।। १०१

मुक्तिं मुक्तिं ददे देवाः सर्वत्रास्मि महीतले ।
इच्छन्वांछाधिकं नृणां पापानि च हरंस्तथा ।। १०२

-०-०-

बी १ मिम, बी-२ कृत्वादे, ई बी ३ ता, ई बी ४ तिं,
ई बी ५ अत्रा, ई बी ६ च, ई बी ७ प, ई बी ८ व्यक्तमूर्तिरं,
ई बी १० स्मिन - ई व्यक्तमूर्तिहरं देवाः ९ मुक्तिमुक्ति

श्लोक

श्लोक

(ए१) कृत्वादेशनदेवतैः
(ए२) भुवने त्रये
(ए३) वृषभ
(ए४) स्या
(ए५) तिलां
(ए६) भुक्तिमुक्ति
(ए७) रहंदेवाः

त्रैयंबकै सर: श्रेष्ठे अपन्नव्यक्तरूपवान् ।
योगेश्वरोऽहमनिशं स्थास्याम्यत्र न संशय: ।। १०३

इयं योगेश्वरी देवी योगशक्ति:[1] परा मम ।।
मनुष्या[ए1] ये हि नन्स्यन्ति[ए1] किंचित्तेषां न दुर्लभम् ।। १०४

इयं विश्वस्य जननी विश्वस्यस्थिति[2]कारिणी ।।
योगेश्वरी मुमुक्षूणां[3] मुक्तिदा[ए2] नात्र संशय: ।। १०५

सर्वेषामपि[4] तीर्थानामिदं[5] श्रेष्ठं भविष्यति ।। १०६

त्रैयंबकेण[ए3] मंत्रेण जपिष्यंति[6] च ये द्विजा:[7] ।।
आपदस्तं[8] तरिष्यंति सत्यमेतद् ब्रवीमि व: ।। १०७

देवाऊचु: :- एवमस्तु महादेव यदेऽभिरुचितं[10] विभो ।।
यत्रत्वं तत्र तीर्थानि यत्र[11] त्वं तत्र देवता: ।। १०८

-o-

ई बी १ सिद्धि:, ई बी २ स्थिं - ए यास्स- १ ई मनुष्या ध्यायेनमस्यंति-
किंचिते, बी ३- मु, ई बी ४ शा - ए (१) मुक्ति (ए?) नमिष्यन्ति
(ए३) न, बी ५ नांद्यदं, ई बी ६ जपि, ई बी ७- त्रियेद्विजा,
बी ८- ब, ई अपदा, बी-९ ब्रवीमिव: ई ब्रवामिव , ई बी १० रं,
ई बी ११ नितत्रत्वंत्र,

वसिष्ठ उवाच :- अथ प्रणाम्य राजर्षे देवा[१] योगेश्वरं प्रभुम्।।
योगेश्वरीं[२] च तां[३] देवीं विज्वरास्त्रिदिवं[४] ययु: ।। १०९

इत्थं राजन्सरश्रेष्ठं[५] त्र्यंबकमिति श्रुतम्[अ१]।।
श्रीमालस्योदितं[६] तत्तुदेवानामपि दुर्लभम् ।। ११०

यत्र योगेश्वरी[७] देवी यत्र व्यक्तश्च शंकर: ।
तत्र[८] त्र्यंबके तीर्थे को न मुच्येत पातकात् ।। १११

अयमर्थो मयापूर्वमर्बुदे पर्वतोत्तमे[इ१] ।।
कथित: सर्वतीर्थानां मुनीनां च महात्मनाम्[९]।। ११२

तदाप्रभृति तीर्थानि सर्वाण्यर्बुदपर्वतात्[८] ।
आगत्य स्नांति तीर्थेऽस्मिन् मुहूर्ते ब्रह्मदैवके[इ२] ।। ११३

प्रातरूत्थाय य: कुर्यात् स्नानं त्र्यंबकोदके ।।
सर्वतीर्थकृतं स्नानं जायते तस्य देहिन: ।। ११४

-०-०-

ई बी १ देवं, बी २ गी, ई- योगेश्वरं, ई बी ३ तथा, ई बी ४ विज्ञरात्रि, ई बी ५ सर:, ई बी ६ रथादिमु, ई बी ७ रि, ई बी ८ य, १ ई में, ई बी ९ न, २ ई तै ।

(ए१) त्र्यंबक

वाच्यमानमिदं मर्त्यास्तीर्थ माहात्म्यमुत्तमं।
श्रृण्वंति ये समाधाय मुच्यंते तेऽपि पातकात् ।। ११५

-०-

इति स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां ब्राह्म्य-
विभागे तृतीय परिच्छेदे श्रीमाल महात्म्ये श्रीमाल त्र्यंबक सरोमाहात्म्यं
नाम चतुर्दशोऽध्यायः ।। १४ ।।